५ वाह्निभवम् ६ द्रौणी ७ त्रिकूटलवणम् ८। अस्य गुणाः। पाकेनाल्पलवणत्वम्। अविदाहित्वम्। भेदनत्वम्। स्निग्धत्वम्। शूलनाशित्वम्। अल्पपित्तलत्वञ्च। इति राजनिर्घण्टः॥

द्रोहः, पुं, (द्रुह्+भावे घञ्।) जिघांसा। अनिष्टचिन्तनम्। तत्पर्य्यायः। अपक्रिया २। इति हेमचन्द्रः।६।१५१॥ यथा, कूर्म्मपुराणे।
"देवद्रोहाद्गुरोर्द्रोहः कोटिकोटिगुणाधिकः॥"
(छद्मवधः। यथा, मनौ। ७।४८।
"पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डञ्चापि पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥"
"द्रोहश्छद्मवधः।" इति तट्टीकायां कुल्लूकभट्टः॥)

द्रोहचिन्तनं, क्ली, (द्रोहस्य चिन्तनम्।) परानिष्टचिन्ता। तत्पर्य्यायः। व्यापादः २। इत्यमरः।१।५।४॥

द्रोहाटः, पुं, (द्रोहाय अटतीति। अट्+अच्।) गाथाप्रभेदः। मृगलुब्धकः। वैडालव्रतिकः। इति मेदिनी। टे, ४६॥

द्रोही, [न्] पुं, (द्रोहोऽस्यास्तीति इनिः। यद्वा, द्रुह्यतीति णिनिः।) द्रोहकः। परानिष्टचिन्तकः। यथा,—
"मित्रद्रोही कृतघ्नश्च ये च विश्वासघातकाः।
ते नरा नरके यान्ति यावच्चन्द्रदिवाकरौ॥"
इति ससेमिरोपाख्यानम्॥
(यथा च, कथासरित्सागरे। ५।६३॥
"तच्छ्रुत्वाचिन्तयद्राजा नूनं द्रोही स एव मे॥")

द्रौणायनः, पुं, (द्रोणस्यापत्यम्। द्रोण+फक्।) अश्वत्थामा। इति त्रिकाण्डशेषः॥

द्रौणिः, पुं, (द्रोणस्यापत्यम्। द्रोण+इञ्।) अश्वत्थामा। इति शब्दरत्नावली॥ (यथा, महाभारते। ४।५६।७४।
"आहत्य तु महाबाहुर्यतो द्रौणिस्ततो हयान्॥"
अयं हि एकोनत्रिंशद्द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १।३।२३।
"एकोनत्रिंशत् संप्राप्ते द्रौणिर्व्यासो भविष्यति॥")

द्रौणिकः, त्रि, (द्रोणस्य द्रोणपरिमितबीजस्य वापः इति। द्रोण+"तस्य वापः।" ५।१।४५। इति ठक्।) द्रोणपरिमितबीजवपनयोग्यक्षेत्रम्। इत्यमरः।२।६।१०॥ (द्रोणेन क्रीतः। निष्कादित्वात् ठक्। द्रोणक्रीतः॥ द्रोणं द्रोणपरिमितद्रव्यं पचतीति। द्रोण+"संभवत्यवहरति पचति।" ५।१।५२। इति ठञ्। द्रोणपाचकः। इति सिद्धान्तकौमुदी॥)

द्रौपदी, स्त्री, (द्रुपदस्यापत्यं स्त्री। द्रुपद+अण्। ङीप्।) द्रुपदराजकन्या। तत्पर्य्यायः। पाञ्चाली २ कृष्णा ३ सैरिन्ध्री ४ नित्ययौवना ५ वेदिजा ६ याज्ञसेनी ७। इति हेमचन्द्रः। ३।३७४॥ अस्याः पञ्चस्वामिकारणं यथा,—

वह्निरुवाच।

"शृणु राम! महाभाग! सीतासंगोपनं कुरु।
सप्ताहाभ्यन्तरे चैव रावणो दुष्टराक्षसः।
दुर्निवार्य्यः प्राक्तनेन जानकीञ्च हरिष्यति॥

राम उवाच।

सीतां गृहीत्वा त्वं गच्छ छायाचैव तु तिष्ठतु।
कलत्रवर्ज्जनं कर्म्म सर्व्वेषाञ्च जुगुप्सितम्॥
सीतां गृहीत्वा प्रययौ रुदन्तीञ्च हुताशनः।
सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ॥
सा च छाया हृता पूर्व्वं रावणेन बलीयसा।
समुद्दधार तां रामो निहत्य तं सबान्धवम्॥
वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह।
अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम्॥
सा च छाया तपश्चक्रे नारायणसरोवरे।
तपश्चकार दिव्यञ्च शतवर्षञ्च शूलिनः॥
वरं वृणुष्व भद्रे! तमुवाच शङ्करश्च ताम्।
उवाच सा शिवं व्यग्रा भर्त्तुर्दुःखेन दुःखिता॥
पतिन्देहि पञ्चधा सा वरं वव्रे त्रिलोचनम्।
सर्व्वसम्पत्प्रदस्तुष्टस्तस्यै शर्व्वो वरं ददौ॥

महादेव उवाच।

साध्वि! त्वं पञ्चधा ब्रूहि पतिन्देहीति व्याकुला।
पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति प्रियास्तव॥
ते च सर्व्वे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः।
सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा॥
कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदी छाया तेन कृष्णा त्रिहायणी॥
वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्त्तिता।
स्वर्गलक्ष्मीर्महेन्द्राणां सा च पश्चाद्भविष्यति॥
राजा ददौ फाल्गुनाय कन्यायाश्च स्वयंवरे।
पप्रच्छ मातरं वीरो वस्तु प्राप्तं मयाधुना॥
तमुवाच स्वयं माता गृहाण भ्रातृभिः सह।
शम्भोर्वरेण पूर्व्वञ्च परञ्च मातुराज्ञया॥
द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः।
चतुर्द्दशानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११५ अध्यायः॥

द्वन्दं क्ली, (द्वन्द्वं पृषोदरादित्वात् वस्य लोपः।) मिथुनम्। इति शब्दरत्नावली॥

द्वन्द्वं, क्ली, (द्वौ द्वौ सहाभिव्यक्तौ। "द्वन्द्वं रहस्यमर्य्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु।" ८।१।१५। इति द्विशब्दस्य द्विर्वचनं पूर्व्वपदस्यामुभावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते।) रहस्यम्। कलहः। (यथा, हितोपदेशे। ३।३२।
"शतं दद्यान्न विवदेदिति शास्त्रस्य लक्षणम्।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम्॥")
मिथुनम्। (यथा, रघुः। १।४०।
"परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु॥")
युग्मम्। इति मेदिनी। वे, १०॥ (यथा, महाभारते। १।१३७।१५।
"द्वन्द्वयुद्धञ्च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो!॥"
शीतोष्णादि। यथा, माघे। ४।६४।
"सर्व्वर्त्तुनिर्वृतिकरे निवसन्नुपैति
न द्वन्द्वदुःखमिह किञ्चिदकिञ्चनोऽपि॥")
दुर्गम्। (अत्र पुंस्त्वमपि।) अथ द्वन्द्वयुक्तिः।
"राज्ञो बलं न हि बलं द्वन्द्वमेव तलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"
तथा च।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्।
यद्दैवसूचितं द्वन्द्वं गिरिनद्यादिसंश्रितम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यद्भवेदिह।
कृत्रिमं नाम विज्ञेयं लङ्घ्यालङ्घ्यन्तु वैरिणाम्॥"
तत्राकृत्रिमद्वन्द्वयुक्तिर्यथा,—
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः।
सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्द्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यदन्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम्॥
तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम्॥"*॥
कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गर्त्तैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वत्वेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकिसङ्कटम्।
द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥
अधोऽधोवध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्व्वतः परिखां कृत्वा निबन्ध्योपरि कन्दरम्।
तज्जलप्लुतदेशत्वात् जलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धनात्।
वर्षासु स्रवते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्वसेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्द्विविधो रिपुः॥
सर्व्वो हि त्रिविधो युद्धः समासादुपदिश्यते।
प्रतिराजस्य राज्यान्ते प्रकटे गुप्त एव च॥
राज्यान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते स्त्रीकोषसम्भारं संरक्षेदिति निश्चयः॥"

अथ सामान्यतो गुणाः।

तथा हि। नीतिशास्त्रम्।
"सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते।
अन्यत्र बन्दिशालेव न तादृग्द्वन्द्वमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वरद्वन्द्वञ्च तानि षट्॥"
अन्ये तु।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्धृद्वन्द्वं प्रकीर्त्तितम्।
योद्धृशून्यं हि यत् द्वन्द्वं कृतकायसमं हि तत्॥"